# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
## सत्रान्तपरीक्षा-अक्टूबर-२०१९

**कक्षा – शास्त्रीतृतीयवर्षम्** **प्रश्नपत्रम् – ६** **गुणा: - ७०**
**(SEM-5)**
**विषय: -** **कोड – CC3510 (NEW)** **समय: - ०३ त: ०६**
**स्वामिनारायणवेदान्तः (S)**
**दिनाङ्क: - १५-१०-२०१९** **सन्दर्भग्रन्थः – भद्रेशस्वामिविरचित–गीताभाष्यम्**

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १** **कयोश्चिद् द्वयोः व्याख्या कार्या।** **१०**

१. इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।
एतं यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः॥
२. उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः॥
३. गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान्।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते॥

**प्रश्नः – २** **एकं निबन्धात्मकोत्तरं लिखत।** **१०**

१. प्रत्यगात्मि अक्षरब्रह्मरूपत्वसम्पत्तिसौकर्याय उपादेयगुणाः यथाभाष्यंनिरूपणीयाः।
२. गुणातीतस्य पुरुषस्य लक्षणानि।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३** **कयोश्चिद् द्वयोः व्याख्या कार्या।** **१०**

१. न तद्भासयते सूर्यो न शशाङ्को न पावकः।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम॥
२. यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।

अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

३. दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ॥

**प्रश्नः – ४ एकं निबन्धात्मकोत्तरं लिखत । १०**

१. पुरुषोत्तमयोगे पुरुषोत्तमस्य निरूपणम् ।

२. दैवीं चासुरीं च संपदं निरूप्य तयोः फलभेदं लिखतु ।

## तृतीयान्वितिः(Unit - 3)

**प्रश्नः – ५ कयोश्चिद् द्वयोः व्याख्या कार्या । १०**

१. अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥

२. मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥

३. सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच ॥

**प्रश्नः – ६ एकं निबन्धात्मकोत्तरं लिखत । १०**

१. त्रिविधा श्रद्धा ।

२. सिद्धिं प्राप्तो यथा ब्रह्म, तद्ब्रह्मभावापन्नस्य लाभोऽपि वर्णनीयः ।

## चतुर्थान्वितिः (युनिट-4)

**प्रश्नः – ७ दशानामतिलघूत्तराणि देयानि । १०**

१. वैश्यकर्म किम् ?

२. शौर्यं तेजो धृतिर्दाक्ष्यमिति कस्य स्वभावजं कर्म ?

३. कर्मणः कतिविधं फलम्? किं च तत् ?
४. अनुपकारिणे दातव्यं दानं कीदृशम् ?
५. सात्त्विकाः कान् यजन्ते ?
६. नरकस्य त्रिविधं द्वारं किम् ?
७. द्वौ भूतसर्गौ कौ ?
८. अतोस्मि लोके वेदे च प्रथितः..................... (रिक्तस्थानं पूरयतु)
९. द्वाविमौ पुरुषौ – इति श्लोके कः क्षरः कश्चाक्षरः ?
१०. अन्नं कतिविधम् ?
११. सर्वारम्भपरित्यागी कः उच्यते ?
१२. चतुर्दशाध्यायस्य नामधेयं किम् ?
१३. पञ्चदशाध्यायस्य नामधेयं किम् ?
१४. शरणागतियोगः कस्याध्यायस्य नामधेयम् ?
१५. अर्जुनप्रोक्तं अन्तिमं वर्णत्रयं (वाक्यं) किम् ?

*****